# Shri Bala Sagunamanasapuja

# श्रीबालासगुणमानसपूजा

## Document Information

Text title : bAlAsaguNamAnasapUjA

File name : bAlAsaguNamAnasapUjA.itx

Category : devii, dashamahAvidyA, devI, pUjA

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# श्रीबालासगुणमानसपूजा

प्रबोधनं

१०. उषसि मागधमङ्गगायनैः झटिति जागृहि जागृहि जागृहि । -
(१०. ॐ ऐं ह्रीं श्रीं ऐं क्लीं सौः सौः क्लीं ऐं इत्यस्य सङ्केतः) -
अतिकृपार्द्रकटाक्षनिरीक्षणैः जगदिदं जगदम्ब सुखीकुरु ॥

मण्डपप्रवेशः

१०. कनकमयवितर्दिशोभमानं दिशिदिशि पूर्णसुवर्णकुम्भयुक्तम् ।
मणीमयमण्डपमध्यमेहि मातः मयि कृपयाशु समर्चनं ग्रहीतुम् ॥

कनकमयवितर्दिस्थापिते तूलिकाढ्ये
विविधकुसुमकीर्णे कोटिबालार्कवर्णे ।
भगवति रमणीये रत्नसिंहासनेऽस्मिन्
उपविश पदयुग्मं हेमपीठे निधाय ॥

—- पाद्यं

१०. दूर्वया सरसिजान्वितविष्णुक्रान्तया च सहितं कुसुमाढ्यम् ।
पद्मयुग्मसदृशे पदयुग्मे पाद्यमेतदुररीकुरु मातः ॥

अर्घ्यं

१०. गन्धपुष्पयवसर्षपदूर्वासंयुतं तिलकुशाक्षतमिश्रम् ।
हेमपात्रनिहितं सहरत्नैः अर्घ्यमेतदुररीकुरु मातः ॥

आचमनं

१०. जलजद्युतिना करेण जातीफलतक्कोललवङ्गगन्धमिश्रैः ।
अमृतैरमृतैरिवातिशीतैः भगवत्याचमनं विधीयताम् ॥

मधुपर्कः

१०. निहितं कनकस्य सम्पुटे पिहितं रत्नपिधानकेन यत् ।
तदिदं जगदम्ब तेऽर्पितं मधुपर्कं जननि प्रगृह्यताम् ॥

स्नानं

१०. एतच्चम्पकतैलमम्ब विविधैः पुष्पैर्मुहुर्वासितं
न्यस्तं रत्नमये सुवर्णचषके भृङ्गैर्भ्रमद्भिर्वृतम् ।
सानन्दं सुरसुन्दरीभिरभितो हस्तैर्धृतं ते मया
केशेषु भ्रमरभ्रमेषु सकलेष्वङ्गेषु चालिप्यते ॥

मातः कुङ्कुमपङ्कनिर्मितमिदं देहे तवोर्द्वर्तनं
भक्त्याहं कलयामि हेमरजस सम्मिश्रितं केसरैः ।
केशानामलकैर्विशोध्य विशदान्कस्तूरिकोदञ्चितैः
स्नानं ते नवरत्नकुम्भसहितैः संवासितोष्णोदकैः ॥

दधिदुग्धघृतैः समाक्षिकैः सितया शर्करया समन्वितैः ।
स्नपयामि तवाहमादराज्जननि त्वां पुनरुष्णवारिभिः ॥

एलोशीरसुवासितैः सुकुसुमैर्गङ्गादितीर्थोदकैः
माणिक्यामलमौक्तिकामृतरसैः स्वच्छैः सुवर्णोदकैः ।
मन्त्रान्वैदिकतान्त्रिकान्परिपठन् सानन्दमत्यादरात्
स्नानं ते परिकल्पयामि जननि स्नेहात्त्वमङ्गीकुरु ॥

वस्त्रधारणं केशप्रसाधनं च

१०. बालार्कद्युतिदाडिमीयकुसुमप्रस्पर्धि सर्वोत्तमं
मातस्त्वं परिधेहि दिव्यवसनं भाक्त्या मया कल्पितम् ।
मुक्ताभिर्ग्रथितं सुकञ्चुकमिदं स्वीकृत्य पीतप्रभं
तप्तस्वर्णसमानवर्णमतुलं प्रावर्णमङ्गीकुरु ॥

१०. बहुभिरगरुधूपैः सादरं धूपयित्वा
भागवति तव केशान्कङ्कतैर्मार्जयित्वा ।
सुरभिभिररविन्दैश्चम्पकैश्चर्चयित्वा
झटिति कनकसूत्रैर्जूटयन्वेष्टयामि ॥

आभरणभूषणं

१०. मञ्जीरे पदयोर्निधाय रुचिरां विन्यस्य काञ्चीं कटौ
मुक्ताहारमुरोजयोरनुपमां नक्षत्रमालां गले ।
केयूराणि भुजेषु रत्नवलयश्रेणीं करेषु क्रमात्
ताटङ्के तव कर्णयोर्विनिदधे शीर्षे च चूडामणिम् ॥

धम्मिल्ले तव देवि हेमकुसुमान्याधाय फालस्थले

मुक्ताराजिविराजमानतिलकं नासापुटे मौक्तिकम् ।
मातर्मौक्तिकजालिकां च कुचयोः सर्वाङ्गुलीषूर्मिकाः
काट्यां काञ्चनकिङ्किणीर्विनिदधे रत्नावतंसं श्रुतौ ॥

गन्धकुङ्कुमाक्षतधारणं

(१०) मातः फालतले तवातिविमले काश्मीरकस्तूरिका-
कर्पूरागरुभिः करोमि तिलकं देहेऽङ्गरागं ततः ।
वक्षोजादिषु यक्षकर्दमरसं सिक्त्वा च पुष्पद्रवं
पादौ चन्दनलेपनादिभिरहं सम्पूजयामि क्रमात् ॥

(१०) रत्नाक्षतैस्त्वां परिपूजयामि मुक्ताफलैर्वा रुचिरैरविद्धैः ।
अखण्डितैर्देवि यवादिभिर्वा काश्मीरपङ्काङ्किततण्डुलैर्वा ॥

(१०) सीमन्ते ते भगवति मया सादरं न्यस्तमेतत्
सिन्दूरं मे हृदयकमले हर्षवर्षं तनोति ।
बालादित्यद्युतिरिव सदा लोहिता यस्य कान्तिः
अन्तर्ध्वान्तं हरति सकलं चेतसा चिन्तयैव ॥

पुष्पालङ्करणं

१०. मन्दाकुन्दकरवीरलवङ्गपुष्पैः
त्वां देवि सन्ततमहं परिपूजयामि
जातीजपावकुलचम्पककेतकादि -
नानाविधानि कुसुमानि च तेऽर्पयामि ॥

मालतीवकुलहेमपुष्पिका काञ्चनारकरवीरकैतकैः ।
कर्णिकारगिरिकर्णिकादिभिः पूजयामि जगदम्ब ते वपुः ॥

पारिजातशतपत्रपाटलैर्मल्लिकावकुलचम्पकादिभिः ।
अम्बुजैः सुकुसुमैश्च सादरं पूजयामि जगदम्ब ते वपुः ॥

धूपः

१०. लाक्षासम्मिलितैः सिताभ्रसहितैः श्रीवाससम्मिश्रितैः
कर्पूराकलितैः शिरैर्मधुयुतैर्गोसर्पिषा लोडितैः ।
श्रीकण्ठागरुगुग्गुलुप्रभृतिभिर्नानाविधैर्वस्तुभिः
धूपं ते परिकल्पयामि जननि स्नेहात्त्वमङ्गीकुरु ॥

दीपः

१०. रत्नालङ्कृतहेमपात्रनिहितैर्गोसर्पिषा लोडितैः
दीपैर्दीर्घतरान्धकारभिदुरैः बालार्ककोटिप्रभैः ।
आताम्रज्वलदुज्ज्वलप्रविलसद्रत्नप्रदीपैस्तथा
मातस्त्वामहमादरादनुदिनं नीराजयाम्युच्चकैः ॥

निवेदनं

१०. मातस्त्वां दधिदुग्धपायसमहाशाल्यन्नसन्तानिका -
सूपापूपसिताघृतैः सवटकैः सक्षौद्ररम्भाफलैः ।
एलाजीरकहिङ्गुनागरनिशाकुस्तुम्भरीसंस्कृतैः
शाकैः साकमहं सुधाधिकरसैः सन्तर्पयाम्यर्चयन् ॥

सापूपसूपदधिदुग्धसुधाघृतानि
सुस्वादुभक्तपरमान्नपुरस्सराणि ।
शाकोल्लसन्मरिचजीरक बाह्लिकानि
भाक्ष्याणि भुङ्क्ष्व जगदम्ब मयार्पितानि ॥

क्षीरमेतदिदमुत्तमोत्तमं प्राज्यमाज्यमिदुमुज्ज्वलं मधु ।
मातरेतदमृतोपमं पयः सम्भ्रमेण परिपीयतां मुहुः ॥

उष्णोदकैः पाणियुगं मुखं च प्रक्षाल्य मातः कलधौतपात्रे ।
कर्पूरमिश्रेण सकुङ्कुमेन हस्तौ समुद्वर्तय चन्दनेन ॥

अतिशीतमुशीरवासितं तपनीये कलशे निवेशितम् ।
पटपूतमिदं जितामृतं शुचि गङ्गाजलमम्ब पीयताम् ॥

जम्ब्वाम्ररम्भाफलसंयुतानि द्राक्षाफलक्षौद्रसमन्वितानि ।
सनारिकेलानि सदाडिमानि फलानि ते देवि समर्पयामि ॥

कूश्माण्डकोशाटकिसंयुतानि जम्बीरनारङ्गसमन्वितानि ।
सबीजपूराणि सबादराणि फलानि ते देवि समर्पयामि ॥

ताम्बूलं

१०. कर्पूरेण युतैर्लवङ्गसहितैस्तक्कोलचूर्णान्वितैः
सुस्वादुक्रमुकैः सगौरखदिरैः सुस्निग्धजातीफलैः ।
मातः कैतकपत्रपाण्डुरुचिभिस्ताम्बूलवल्लीदलैः
सानन्दं मुखमण्डनार्थमतुलं ताम्बूलमङ्गीकुरु ॥

गोधूमदीपाराधनं

१०. सविनयमथ दत्वा जानुयुग्मं धरण्यां
सपदि शिरसि धृत्वा पात्रमारार्तिकस्य ।
मुखकमलसमीपे तेऽम्ब सार्धं त्रिवारं
भ्रमयति मयि भूयात्ते कृपार्द्रः कटाक्षः ॥

स्वर्णमन्त्रपुष्पाञ्जलिः
१०. अथ बहुमणीमिश्रैः मौक्तिकैस्त्वां विकीर्य
त्रिभुवनकमनीयैः पूजयित्वा च वस्त्रैः ।
मिलितविविधमुक्तां दिव्यमाणिक्ययुक्तां
जननि कनकवृष्टिं दक्षिणां तेऽर्पयामि ॥

चरणनलिनयुग्मं पङ्कजैः पूजयित्वा
कनककमलमालां कण्ठदेशेऽर्पयित्वा ।
शिरसि विनिहितोऽयं रत्नपुष्पाञ्जलिस्ते
हृदयकमलमध्ये देवि हर्षं तनोतु ॥

इति श्रीबालासगुणमानसपूजा समाप्ता ।

Proofread by PSA Easwaran

---

*Shri Bala Sagunamanasapuja*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*